संस्कृत-भवितव्यम्

● निरन्तरं पञ्चषष्टिवर्षाणि प्रकाश्यमानं विश्वस्य एकमेव संस्कृतसाप्ताहिकम् ●

संस्कृत-भाषा-प्रचारि-सभायाः मुखपत्रम्

अङ्क-मूल्यम् रु. ५/- वा. शु. : रु. २५०/-	PRINTED MATTER	वृत्तपत्र-पञ्जीयन-संख्या RN 11454/57

Core Banking Facility :
Name : Sanskrit Bhasha Pracharini Sabha
A/c No. : 30362855441
IFSC/CIF Code : SBIN0004872

डाकप्रेषण पञ्जीयनसंख्या NGP-27 Postage Licence No. 9

संपादिका
डॉ. लीना रस्तोगी

सहसंपादिकाद्वयम्
डॉ. वीणा गानु, डॉ. शारदा गाडगे

संस्थापक-संपादक:
स्व. डॉ. श्री. भा. वर्णेकर

वर्षम् ६५, अङ्कः ५१
शनि. दि. ५ मार्च २०१६, माघ कृ. ११ शके १९३७, युगाब्द ५११७

ISBN 978-0-00-000978-4
13 Digit ISBN : 978-1-890041-04-5
Barcode ISBN : 978-0-00-000978-4:18900

प्रबन्धिका
डॉ. प्रज्ञा देशपाण्डे
prabandhika.sanskbhavitavyam@gmail.com

प्रकाशक:
डॉ. चन्द्रगुप्त वर्णेकर
०९३७०८०३९१३
cswarnekar@gmail.com

संस्कृत-भवनम्,
२, पश्चिम: उच्च-न्यायालय-मार्गः, नागपुरम् - ४४० ००१.

www.sanskritbps.org

वार्ता:



■ **विश्वसंस्कृतपुरस्कारः** भारतसर्वकारेण ऐषमः प्रथमतः एव संस्थापितः एषः पुरस्कारः थाईदेशस्य राजकुमार्यै महाचकरी-सीरिन्थोरन्-वर्यायै प्रदीयते। षष्टिवर्षदेशीया महोदया संस्कृतस्य विदुषी षोडश-विश्वसंस्कृतसम्मेलनस्य च संरक्षिका, सफल-संयोजिका च।

■ **संस्कृतभाषायाः संवर्धनाय** केन्द्रसर्वकारेण पूर्व-निर्वाचनायुक्तस्य **श्री. एन् गोपालस्वामिनः** आध्यक्ष्ये त्रयोदशसदस्यीया समितिः संस्थापिता आसीत्। अनया समित्या प्रतिवेदनं केन्द्रसर्वकाराय प्रस्तुतमस्ति।

■ **कॉङ्ग्रेसपक्षस्य राहु(ल)कालः -** जवाहरलाल-नेहरू-विश्वविद्यालयप्रकरणे उपाध्यक्षस्य गान्धिराहुलस्य हस्तक्षेपः, हैदराबादविद्यापीठस्य रोहित-प्रकरणे तस्य वृथा जल्पनम्, इशरत्जहाँप्रकरणे चिदम्बरम्वर्यस्य शपथपत्रे परिवर्तनम्, पुत्रेण कार्तिकेयेन सह तस्य अधिकोश-भ्रष्टाचारे सहयोगः, हरियाणाप्रदेशे जाटान्दोलने द्वेषाग्निसिञ्चनम्, आग्रानगरे विश्वहिन्दु-परिषदः कार्यकर्तुः हत्याप्रकरणे, नागाशान्तिसन्धि-विषये इत्यादिषु प्रकरणेषु कॉङ्ग्रेसपक्षस्य व्यवहारः नीतिशून्यः, द्वेषपूर्णः च वर्तते। नूनं महात्मगान्धेः कॉङ्ग्रेस-विसर्जनस्य आदेशं परिपालयति राहुलसमवेताः नैके पक्षनेतारः।

■ **ऋषिकेशे परमार्थनिकेतनाश्रमे** साप्ताहिकम् अन्ताराष्ट्रियं योगशिबिरम् मुख्यमन्त्रिणा हरीशरावतवर्येण २ मार्चदिनाङ्के समुद्घाटितम्।

■ **आकाशपुष्पस्य जनकौ अन्तरिक्षवीरौ पृथ्वीं प्रत्यागतौ।** अमेरिकादेशस्य स्कॉट्-केली, रशियादेशस्य च मिखाईल् कोर्निंको ३४० दिनानि यावत् अन्तरिक्ष-स्थानके स्थित्वा २ मार्च दिनाङ्के कझगिस्ताने भूगतौ। दीर्घकालमवकाशे प्रवासकारणात् स्वास्थ्यादिषु परिणामाः परीक्ष्यन्ते।

■ **विदर्भ-मराठवाडा-भागयोः** वर्षा हिमपातश्चाभवत् मार्चमासारम्भे। गोधूम-नारिङ्गाम्रादयः आहताः।

■ **नागपुरमहोत्सवः सुसम्पन्नः -** महापालिकया महाराष्ट्र-पर्यटन-विकासमहामण्डलस्य सहकार्येण समायोजितेऽस्मिन् उपक्रमे लोककला, नृत्य-प्रकाराः, गानप्रकाराः, नाट्यप्रयोगाश्च विविधैः सांस्कृतिक-कलाकारैः प्रस्तुताः। महापालिकायाः १५२ तमः वर्धापनदिवसश्चानुष्ठितः। महोत्सवेऽस्मिन् नागपुरस्य संस्कृतिवैशिष्ट्यं प्रदर्शनीयमिति मुख्यमन्त्री।

■ **छत्तिसगढे नक्षलातङ्कवादः** नैकेषां माओवादिनां शरणागतिः, सीमाप्रदेशे रक्षकैः सह सङ्घर्षे पराभवः, सर्वकारस्य सुयोग्यं रक्षाकार्यं, जनताजनार्दनस्य च असहकारः इत्यादिभिः प्रकारैः कुपिताः क्रुद्धाः नक्षलातङ्कवादिनः सीमाग्रामाणि आक्रम्य निःशस्त्रान् ग्रामवासिनः निरन्तर-गुलिकाप्रहारस्य लक्ष्यं कृतवन्तः।

■ **सभायाः गीतावर्गस्य शिक्षायात्रा** शनिवासरे भविता। प्रातः ९ वादने संस्कृतभवनात् देवलापार-गोविज्ञान-केन्द्रं प्रति बसयानेन प्रस्थानं भविष्यति।

■ **पूर्णो अगितोक सङ्गमा** लोकसभायाः पूर्वसभापतिः, पूर्वोत्तरभारतस्य च उन्नायकः अष्टषष्टिवर्षीयः नेता ४ मार्चदिनाङ्के निधनं गतः।

तावदेव प्रतिष्ठा स्याद् भारतस्य महीतले।
ज्ञानामृतमयी यावत् सेव्यते सुरभारती॥

सम्पादकीयम्

स्त्रीशक्तिः

मार्चमासस्य अष्टमदिनाङ्कः जागतिक-महिला-दिन-रूपेण सर्वत्र सम्पाद्यते। किं तस्यौचित्यं, कीदृशी कियती वा फलावाप्तिरिति नात्र कथ्यवस्तु। तथाप्ययं लेखनप्रपञ्चः। कस्मात्? - अस्माकं गौरवमयी वरेण्यशरण्या संस्कृतिः सुसंरक्षिता चेत्, न महिलादिनस्य किमपि प्रयोजनमभविष्य-दिति विचारेण!

अहो गुरुजनपूजका वयं भारतीयाः। औपनिषदे दीक्षान्त-समारम्भे, अन्तेवासिनमनुशासितरि गुरौ ''मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव'' इति क्रमः। नमस्यसूच्यां मातृदेवताया एव नाम भवत्यग्रक्रमेण।

भवतु नाम। सा तु वेदाध्ययनपरयोः संस्कृतिसंवर्धकयोरेव गुरुशिष्ययोः कथा। परन्तु अखिलमानवस्वभावचित्रणे-ऽद्वितीयस्य महाभारतस्यापि तथैव चिन्तनम्। आदिपर्वणि वर्तते बकासुरस्याख्यानम्। एकचक्रानगरीनिवासी सामान्यस्तरीयः कश्चिद् ब्राह्मणः। तस्यैव गृहतो बकासुरस्य कृते आहारः प्रेषणीयः। स ब्राह्मणः स्वयमेव बलीभवितुमिच्छति, न स्वपत्नीं तथा कर्तुमनुमन्यते। स वदति,

''सहधर्मचरीं दान्तां नित्यं मातृसमां मम।
सखायं विहितां देवैर्नित्यं परमिकां गतिम्॥''

ईदृशीं त्वामहं कथं मृत्युमुखे पातयिष्यामि? - सा तस्य न केवलं सहधर्मिणी, ''सखा'' अपि! - न सखीति वदति सः, ''सखायम्'' इति पुंवत् सम्बोधयति! ईदृशी एकात्मता!

कविकुलगुरुचित्रितस्य अजस्य कृते तु इन्दुमती ''गृहिणी'', ''सचिवः'', ''सखी'' इति सर्वमेव खल्वासीत्। ईदृश्यां स्त्रीशक्तिपूजिकायां संस्कृतौ कुतो महिलादिनस्या-वकाशः प्रयोजनं वा यदा ''स्मृति'' (इरानी) सदृशी विद्युत् विपक्षीयान् संसद्द्वयेऽपि कथं वाग्बाणैः भस्मीकरोतीति स्मृतिः न कदापि म्लानतां गच्छेत्?

ननु माता एव प्रथमो गुरुः। त्रिकालाबाधितं सत्यमेतत्। प्राचीनानां कुन्ती-विदुला-सदृशीनामुदाहरणानि सुविदिता-न्येव। मध्यकालीना शिवमाता जिजाम्बापि तथैव संस्कार-दायिनी वीरप्रसूः। किं बहुना? गान्धारी-सदृशी मन्दभागा कुपुत्रजननी अपि वन्दनीया भवति। पश्यतु। महाभारतयुद्धारम्भे मातुराशीर्वचांसि प्राप्तुकामाय दुर्योधनाय तया प्रदत्तः सन्देश एव तस्या वन्दनीयत्वे प्रमाणम्। नेत्रहीनस्य पुत्रमोहान्धस्य च धृतराष्ट्रस्य सा मनस्विनी विवेकशीला पत्नी न तदा ''दीर्घायुर्भव'', ''विजयमवाप्नुही''ति वा अवोचत्। संस्कार-माहात्म्यं, शास्त्रगरिमाणं च सुष्ठु ज्ञात्वा तया पुत्रमोहोऽपि सुविजितः। **''यतो धर्मस्ततो जयः''** इत्येव तस्या वचांसि। एतत्तु तस्या दौर्भाग्यं यन्न दुर्योधनस्तत्सन्देशस्य दायित्वं सुचारु-रूपेण निर्व्यूढवानिति नात्र शङ्कालेशोऽपि।

अधुना समाजो भिन्नायामवान्। ध्येयानि भिन्नानि, यद्यपि ध्येयदृष्टिस्तु तथैव यथा पूर्वम्। ध्येयविषयेषु, कर्तव्यकर्मसु च परिवर्तनं जातम्। तथापि, अस्मिन्नपि काले नास्माकं स्त्रीशक्तिर्विलुप्ता। जयपुरवासिन्याः मीनू-भंबानी-जनन्याः उदाहरणं मुखरतया प्रतिपादयति यत् विपरीतामपि परिस्थितिं नमयितुं स्त्रीशक्तिः समर्था।

मीनूनाम्नीयं निम्नवर्गीयपरिवारे लब्धजनिर्बालिका जन्मतः पोलियोग्रस्ता विकलाङ्गा आसीत्। गृहपाठशालयोः मध्ये अष्टकिलोमिटरमितम् अन्तरम्। माता सायकलयानेन तां प्रापयति स्म। किन्तु कक्ष्यायां सा क्लान्तिमनुभवति स्म। गणितविषयस्याकलनं तस्या नासीत्। विद्यालयशुल्कं (३० रूप्यकाणि) तु कथंचित् पूर्यते स्म किन्तु अतिरिक्ताध्ययनं (ट्यूशन) असम्भवमासीत् यतो हि तत्र शुल्कमासीत् १५० रूप्यकाणि, पितुर्वेतनं तु ८०० रूप्यकाणि! - षष्ठकक्षायां सा नैव सफलाऽभूत्। अनुत्तीर्णा सा। - पूर्वमेव पोलियोकारणात् समवयस्कानामुपहासभाजनमासीत्। इदानीं तु अनुत्तीर्णता-कलङ्कोऽपि भालपट्टे लग्नः। तस्याः शालेयशिक्षणमेव व्यर्थमिति केषाञ्चित्परिवारजनानां धारणा।

एकतः शारीरिकवैकल्यमपरतो विद्यालयेऽपयशः, तदुपरि (विहाय मातापितरौ) सर्वेषां तां प्रत्युपेक्षाभावः। सा नैराश्य-ग्रस्ताऽभवत्। किन्तु धन्या तस्या माता या नैराश्यतमसस्तां जीवनज्योतिरगमयत्। मीनायाः समीपे न शारीरदार्ढ्यमासीन्न वा धनसम्पन्नता। केवलं मातुः प्रेरकशब्दा एव तां पुनर्बलवतीमकुर्वन्। विलुप्तमात्मविश्वासं पुनरपि संगृह्य मातुः प्रेरणया तयाऽध्ययनं पूर्णतां नीतम्।

राजस्थानविश्वविद्यालयतस्तया आचार्य (पीएच्.डी.) उपाधिरपि प्राप्तः। राष्ट्रियविकलाङ्गोन्नतिकेन्द्रे (National Centre for Disables) कतिपयवर्षपर्यन्तं सेवां दत्त्वा सा राजस्थानशासने सहायुक्तपदे नियुक्ता जाता। तदनन्तरं फोर्ड फाउंडेशनतः साहाय्यं प्राप्य अमेरिकायाम् इलिनॉय विश्व-विद्यालयतः स्नातकोत्तरं प्रशिक्षणं तया अधिगतम्। ततश्च निरन्तरम् अशासकीयसंस्थाभिः (N.G.O.) सह सा दिव्याङ्गानां सहायतार्थं प्रयतते। तदर्थं २००९ तमे खैस्ताब्दे शेल हेलन पुरस्कारमपि सा लब्धवती। सर्वमेतत् मातृप्रेरणया।

जागतिकमहिलादिनावसरे एतादृशीनां समर्थानां महिलानां चरित्रतः वयमपि प्रेरणां प्राप्नुयामः। इति शम्।

● डॉ. लीना रस्तोगी

मार्चमासस्य अष्टमः दिनाङ्कः ''जागतिक-महिला-दिन-रूपेण सम्पाद्यते। तदनुलक्ष्य इयं कथा साकूतं प्रकाश्यते।

- सम्पादकमण्डलम्

मूकक्रन्दनम् !

बालिका :- ''आरम्भः ... शुभारम्भः ... भविष्यति अचिरात् मम जीवनस्य शुभारम्भः। मम मातापितरौ अपि एतत् न जानीतः। यतः अहं तु जनन्याः उदरे अस्मि। कतिपयमासानन्तरम् अहं बहिरागमिष्यामि। मम स्वागताय पितरौ उत्कण्ठितौ स्यातां खलु! मम आगमनाय कतिचित् मासाः अवशिष्टाः। अहमस्मि कन्याभ्रूणम्। मम पितरौ न जानीतः यत् तयोः जायमानम् अपत्यं कन्या अस्ति इति। उत्सुकता स्यात् ननु तयोः ज्ञातुम्। अहमपि उत्सुका अस्मि अस्मिन् सुरम्यविश्वे पदार्पणं कर्तुम्। किं .... किं ... परीक्षणाय मां वैद्यं प्रति नयन्ति! अहो उत्कण्ठा मे पित्रोः। कथम् उत्सुकौ तौ मम आगमनाय। अहो आनन्दः। महान् आनन्दः। मम लालनाय, मम पालनाय, सुष्ठु संवर्धनाय कथं कातरौ तौ। अहमपि बहिरागत्य मम बालवचसा पितरौ आनन्दयि-ष्यामि। जाने अहं यत् मम प्रथमोच्चारितः शब्दः स्यात् - अम्ब! मातः!

कदा ... कदा ... मम गृहप्रवेशः कदा भविष्यति इति विचिन्त्य व्याकुला अस्मि।

मम दुडुदुडुधावनेन गृहमिदं आनन्देन आक्रान्तं भविष्यति। मम पृष्ठानुपृष्ठिकया धावयामि पितरम् इतस्ततः। गाढम् आलिङ्गिष्यामि पितरं तस्य प्रत्यागमने। कियान् आनन्दः भविष्यति खलु!

अत्र आगत्य रमणीयान् स्वप्नान् द्रक्ष्यामि। आशापक्षान् धृत्वा आकाशे उन्मुक्तं विहरिष्यामि। ध्येयशिखरम् आरोहिष्यामि। कर्तृत्वगाथां रचयिष्यामि। कुलस्य कीर्तिपताका भविष्यामि। देशस्य यशोदुन्दुभिं निनादयिष्यामि।

मम कृते अधिकाधिकां चिन्तां वक्ष्यन्ति सर्वे। बहु लालनं भविष्यति मम। एतत् सर्वं विचिन्त्य एव मे मनसि आनन्दो जायते। नित्यम् इह आगमनस्य उत्कण्ठा वृद्धिं लभते। किन्तु इदानीं नास्ति तावत् प्रतीक्षायाः अवसरः। अचिरादेव वैद्यमहोदयः मातरं मे परीक्ष्य सूचयिष्यति मम आगगनकालम्।

हुं ... ज्ञातमद्य मे मात्रा पित्रा सर्वम्। वैद्यमहोदयः मातरं परीक्ष्य असूचयत् यत् ते उदरे कन्याभ्रूणं वर्तते इति।

इतः परं कथं प्रतिक्रिया भवेत् तयोः? कीदृशः व्यवहारः स्यात्? चिन्तयामि अहं यत् मम पितरौ वार्ताश्रवणेन आनन्दतुन्दिलौ भूत्वा सर्वेभ्यः इमां वार्ता सानन्दं कथयिष्यतः।

कथं वा स्यात् आवयोः पुत्री? कीदृशी भवेत् सा? सुन्दरी वा अतिसुन्दरी वा? मुखच्छाया कस्य स्यात्? इत्यादि आलोचनं करिष्यतः प्रायः। जायमानायाः पुत्र्याः नाम किं भवेत्? वंशिका वा, लक्ष्मीः वा, उत मानसी इत्यस्मिन् विषये मातापित्रोः कोलाहलः भवेत् ननु इतः परम्। अस्तु। शृणोमि किञ्चित् किं प्रचलति तयोः ...

नूनं मम विषये एव भाषमाणाः सन्ति सर्वे गृहजनाः।

हा हन्त! अहो धिक्!

किं ... किं ... किं शृणोमि अहम् एतत्। सर्वेऽपि गृहजनाः सम्भूय वदन्ति मातरं यत् कन्याभ्रूणं तव उदरे अस्ति। वंशवर्धनाय वयं पुत्रमेव इच्छामः। अस्माकं गृहे प्रथमं कुलदीपकस्य एव आगमनं भविष्यति। तस्मात् पातय कन्याभ्रूणम्। घातय कन्याभ्रूणम्।

अहो! अहो विषमता संसारस्य। किं पातकं मया कृतं यस्मात् मम घातः क्रियते। कः दोषः ममाऽत्र? विधिलिखितमपि जनाः न सहन्ते इति चित्रम्। कन्या वा पुत्रो वा, को भेदः?

अयि मातः अपि शृणोषि?

अयि पितः अपि श्रूयते मे ध्वनिः।

वक्तुकामास्मि ईषद्।

कृपया ... कृपया शृणुथ मम वचांसि।

यथा न केवला भूमिः नापि केवलं बीजं वृक्षोद्गमने प्रभवति तथैव नैकलो नरः न वा एकाकिनी नारी सन्ततेः प्रजननाय, वंशवर्धनाय वा प्रभवति। तर्हि कथं यूयं चिन्तयथ यत् कन्या वंशवर्धनाय न अलम् इति। किम् एकाकी पुत्रः वंशस्य वर्धनं कर्तुं प्रभवेत्? वद अम्ब वद।

तात! किमर्थं मां नेच्छसि, किमर्थं मम जन्मनः प्रागेव मां निराकुरुतः। अहमपि जीवनकाङ्क्षिणी। मया स्वप्नाः द्रष्टव्याः पूरणीयाः च।

मातः! मम बह्व्यः इच्छाः सन्ति। ताः सर्वाः त्वया पूरणीयाः। केवलं त्वमेव समर्थासि ताः पूरयितुम्।

अयि मातः। तवाङ्के सुखेन स्वपनीयं मया। जनकस्य बाहु-पाशं गत्वा सुखम् अनुभोक्तव्यम्। बहिरागत्य द्रष्टुम् इच्छामि सूर्यस्य नवकिरणानि। सुकुमारलताः, मनोरमवृक्षाः, पत्राणि, पुष्पाणि, इन्द्रचापं नभोमण्डलम्। न केवलम् एतावदेव अम्ब! ... द्रष्टुमिच्छामि मे मातृमुखं द्रष्टुमिच्छामि पितरं ...

मया जीवनीयम्। मया स्नेहनीयम्। मया आशनीयम्। मया खेलनीयम्। मया विहरणीयम्। मातः मम जननात् पूर्वमेव किमर्थं मम घातविषये आलोचना? स्त्रीपुरुषपरस्परभेदभावनया कतिपयाः कन्याः हन्यन्ते। किमर्थम् एवम्?

अयि तात! जन्मनः पूर्वं याः इच्छाः, आशाः, अपेक्षाः, विधात्रा अस्माकं भालपट्टे लिखिताः तासां का भवितव्यता?

अम्ब! वास्तविकतया कन्या एव खलु कुलस्य शोभां वर्धयति! नोचेत् किमर्थं सा गृहिणी, गृहस्वामिनी, कुलवर्धिनी, कुललक्ष्मीः इत्यादि सम्बोधनैः संस्तूयते? कन्या एव खलु गृहे

--- *अग्रिमे पृष्ठे*

परिवर्तनस्य अन्तः

''परिवर्तनं सृष्टेः तथा मानवजीवनस्य अपि स्थायिभावः'' इति पाठशालायां पठनसमये नित्यं श्रुतम् आसीत्। एवं च भगवत्कृपया प्राप्ते किञ्चित् अतिदीर्घे आयुषि प्रायः नियमिततया दृश्यमानैः ऋतूनां परिवर्तनैः, देश-समाजजीवने घटितैः उल्लेखनीयैः स्थित्यन्तरैः च तद् अधोरेखितं जातम्। किन्तु सहसा प्रायः द्विशतककालपूर्वं केन अपि विख्यातेन लेखक-महोदयेन उद्घोषितम् अस्ति - ''इतिहासस्य अन्तः!'' इति (End of History !) महाभागेन तेन किं दृष्टं, किं वा अवगतं किं तस्मै प्रतिभातम् इति न जाने। किन्तु इतिहासः नैव अन्तं गतः न वा अवरुद्धः। स तु अग्रे प्रस्थितः - कदा कदा सवेगं कदा कदा मन्दं मन्दम्। अत्र विचारणीयम् - किं नाम एषः इतिहासः? जगति, राष्ट्रे, समाजे यानि यानि परिवर्तनानि समयानुसारं भवन्ति तेषाम् इतिवृत्तं नाम इतिहासः। यदि एवं एतद् तर्हि किम् इतिहासस्य अन्तः नाम परिवर्तनस्य एव अन्तः इति मन्तव्यम्? अस्माकं परिवर्तिनि संसारे, समाजे कथम् एतद् शक्यम्?

अथ द्वाविंशतिवर्षेभ्यः अनन्तरं, २०१४ तमे खिस्ताब्दे सम्पन्नस्य लोकसभानिर्वाचनस्य परिणामान् उपलक्ष्य केनचित् विख्यातेन दैनिकसमाचारपत्रस्य सम्पादक-महोदयेन लिखितम् - ''विचारधारोत्तरवर्गस्य उदयः।'' सृष्टेः दृश्यमानानि परिवर्तनानि ज्ञातानि, प्रायः गृहीतकृतसमानानि एव। तथापि कथं वयं सामाजिकपरिवर्तन-विचारधारायोः परस्परसम्बन्धं - कियत् अपि प्रच्छन्नः सः किं न स्यात् - दुर्लक्षितुं अर्हामः? किम् एतद् स्वीकरणीयं यद् वर्तमानकालात् प्रारभ्य भारते परिवर्तनानि न भविष्यन्ति। अथवा एवं स्यात् - समृद्धिलालसानां, स्वानन्द-मग्नानां, अतिरिक्त-उपभोगवादिनां वर्गः विचारधाराः उपेक्षते इति एतेन सम्पादकमहोदयेन सूचितं स्यात्? यदि समृद्धेः आशा वा स्वप्नः वा विचारधाराः अतिशेते तर्हि यदा सर्वसमावेशिका समृद्धिः नूनं हि यास्यति तदा किं भविष्यति?

अधुना सर्वस्मिन् जगति ''विकास''स्य स्वप्नं दर्शयित्वा जागतिक-अर्थनीतेः विशिष्टदिशायां प्रवेशनं प्रचलितं अस्ति। तेन यदि शाश्वती सर्वंकषा समृद्धिः प्राप्स्यते, तर्हि कीदृशं भवेत् विचारधाराहीनसमाजस्य रूपम्? द्रष्ट्रा आङ्ग्लभाषालेखकेन ऑल्डस् हक्स्ले महोदयेन प्रायः शतकपूर्वम् एव एतादृशस्य समाजस्य चित्रं तस्य ''ब्रेव्ह न्यू वर्ल्ड'' नाम्नि पुस्तके प्रस्तुतम् अस्ति। भयावहं खलु तद् चित्रम्। किं हक्स्ले महोदयस्य भविष्यवाणी नूनं सत्या भवेत्? अथवा फ्रान्सदेशीय-विचारवन्तः व्होल्टेर् महोदयस्य प्रसिद्धा व्यङ्ग्योक्तिः ''विचारः न मनोरञ्जनम्। सहज-साध्या सा प्रक्रिया। अतः सामान्यतः मनुष्यः तां कर्तुं नैव प्रयतते।'' (Thinking is a tideous process. Man and woman will do everything to avoid it)

किमेतत् सततपरिवर्तनशीलसमाजजीवनानुरूपम्?

श्रीधर शुक्ल, ठाणे

तृतीय पृष्ठतः अग्रे ---

मूकक्रन्दनम्!

सर्वेषां सुखदुःखावस्थासु समरसा सती अतिस्नेहेन परिचरति। न केवलं गृहस्य अपितु समाजस्य, देशस्य अधारशिला भवति नारी। सा समाजं पोषयति। यस्मिन् गृहे नार्यः समाद्रियन्ते तद् गृहं परामुन्नतिं खलु लभते। 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' इत्यादि वचनानि किं मिथ्या वा मातः?

अयि पितः! इयं कन्या एव अग्रे गत्वा पत्नी, भगिनी, जननी इति अनेकरूपतां भजते। कन्यासु विद्यमानं गुणबाहुल्यम् आकलय्य वदन्ति खलु जनाः -

'कार्येषु मन्त्री, करणेषु दासी, भोज्येषु माता' इत्यादि। कन्या एव खलु सर्वविधं कल्याणं हितञ्च करोति। सा जननीव रक्षति, गुरुरिव गौरवं वर्धयति। कन्या नाम दयादाक्षिण्ययोः, करुणायाः, त्यागस्य, ममतायाः, स्नेहस्य, पवित्रतायाश्च साक्षात् प्रतिमा एव। तर्हि कथमयं दुराग्रहः पुत्रविषये? किमर्थं निष्ठुराः सर्वे कन्याभ्रूणं प्रति। हा हन्त!

हे अम्ब! किं मे मूकक्रन्दनं न श्रूयते? भवन्तु नाम सर्वेऽपि निष्ठुराः मां प्रति। किन्तु अम्ब त्वमपि? त्वमपि कथमेवं जाता निर्दया?

अपत्यानि प्रति मातॄणां सहजः स्वाभाविकश्च स्नेहः भवति, स्वकीयं सर्वस्वमपि त्यक्तुं शक्नोति माता, महत्कष्टमविगणय्य अपत्यस्य सुखं चिन्तयति। **अत एव खलु सर्वादौ 'मातृदेवो भव' इति उच्यते।**

मातुः आनृण्यं दूरीकर्तुं न कोऽपि कदाचिदपि शक्नोति। पुत्रवत्सला, सुतस्नेहपरायणा, साधुस्वभावा माता समधिकैरपि सहस्राधिकैः प्रयत्नैः लब्धुं पार्यते किम्? अत एव सगर्वं सधैर्यं सत्यमेतत् कथ्यते 'कुपुत्रो जायेत क्वचिदपि कुमाता न भवति'

मातः! मा मारय मां मातः! मा मारय।

मूकक्रन्दनं मम किं न द्रावयति ते मातृहृदयम्?

अयि मातस्त्वं शृणु मे दुःखम्
तवाङ्कुरोऽयं न लुनीहि त्वम्॥''

प्रा. पराग जोशी
कालिदास-संस्कृत-विद्यापीठम्

संस्कृत-भाषा-प्रचारिण्याः सभायाः इदं साप्ताहिकं डॉ. चन्द्रगुप्त वर्णेकरः इत्यनेन सभायाः सचिवेन कृष्णचंद्र एजन्सीज, नागपुरम् इत्यत्र मुद्रापयित्वा संस्कृत-भवने २, पश्चिम-उच्च-न्यायालय-मार्ग, नागपुरे प्रकाशतां नीतम्।